Shri Raghunatha Temple MSS. Library,
JAMMU

No. १२३ / घ

Title गणरत्नमहोदधिवृत्तिः

Author वर्धमानः

Extent २९ पत्र Age

Subject व्याकरण

~~[illegible]~~

[illegible]

१२३

२६ पत्राणि

१५१

गणरत्नमहोदधिवृत्तिरियम्



भा॰वृ॰टी॰

श्रीगणेशाय नमः ॥ श्रीनृसिंहाय नमः ॥ विश्वनाथाय नमः ॥ गणेशकाशीनाथांबुजन्मविष्णुसुरापगाः ॥ लक्ष्मी
भवानी वाग्देवीर्वंदेऽभीष्टार्थसिद्धये ॥१॥ सुखेनैव ग्रहीष्यंति गणरत्नानि यांस्थिताः ॥ वृत्तिः सारभ्यते स्वीयगण
रत्नमहोदधेः ॥२॥ शास्त्रारंभे समाहितसिद्धयेऽभिमतदेवताया ग्रंथकृन्नमस्कारमाह ॥ छ ॥ वाग्देवतायाः क्र

...न्यासः

मरेणवस्तेऊयंति येषां ...पि सर्वार्थदर्शी मुकुरेण तुल्यः प्रकर्षमेति प्रतिभाविलासः ॥३॥ येषां वाग्दे
वतायाश्चरणारेणूनां संस्पर्शमात्रेणापि निर्वलपदार्थप्रतिभासहेतुः प्रतिभाविलासः सातिशयः संपद्य
ते ॥ तेऊ सतीति संबंधः ॥ वाचामधिष्ठात्री देवता वाग्देवतेति सा त्रिप्रायं नाम ऊयंति सर्वोत्कर्षेण वर्तंते ॥ सर्वोत्कृष्ट
त्वेन नमस्कार अरिप्पते इति तान्प्रणतोऽस्मीति लभ्यते ॥ प्रज्ञानवनवोद्भेदखशालिनी प्रतिभा मतेति प्रतिभा
लक्षणां ॥ छ ॥ इदानीं व्याकरणनिष्णातबुद्धीनां पूर्वाचार्याणां स्तुतिमाह ॥ शालातुरीयशाकटांगजचंद्रगोमिन्नदि
ग्वस्त्रभर्तृहरिवामनभोजमुख्याः ॥ मेधाविनः प्रवरदीपककर्तृयुक्ताः प्राज्ञैर्निषेवितपदद्वितया जयंति ॥४॥ छ ॥

शालातुरो नाम ग्रामः सोऽभिजनोऽस्यास्तीति शालातुरीयः पाणिनिः। शाकटांगजः शाकटायनः। पूज्यश्चंद्रश्चांद्र
गोमा। दिग्वस्त्रो देवनंदी। भर्तृहरिर्वाक्यपदीकर्त्ता महाभाष्यव्याख्याता वा। वामनो विश्रांतविद्याधरव्याकरण काशिका
कर्त्ता। भोजः सरस्वतीकंठाभरणकर्त्ता। मुख्यश्शब्दस्यादिवचनत्वाच्छिवस्वामिपतंजलिकात्यायनप्रभृतयो लक्ष्मं
लो दीपककर्त्ता। श्रीभट्टेश्वरसूरिः प्रवरस्यासौ दीपककर्त्ता च प्रवरदीपककर्त्ता। प्राधान्यं चास्याधुनिकवैया
करणपेक्षया। निषेवितं पदद्वितयं चरणद्वयं सुप्तिङ्लक्षणं च येषां ते तथोक्ताः॥छ॥ इदानीं पूर्वशास्त्रोप
न्नतपूर्वकं ग्रंथस्य सारतां दर्शयति॥ विदित्वा शब्दशास्त्राणि प्रयोगानुपलक्ष्य च। स्वशिष्यप्रार्थितां कुर्मो गण
रत्नमहोदधिं॥ शब्दशास्त्राणि पाणि[illegible]न्यादिकृतानि सोपनिबंधानि प्रयोगान् महाकाव्योपनिबद्धानि लक्ष्या
णि लक्ष्यं लक्षणं च सम्यक् ज्ञात्वा गणरत्नमहोदधिनामानं ग्रंथं स्वशिष्यैः कुमारपाल मुनिचंद्रप्रभृतिभिः प्रा हरिपाल
र्थिताः संतो विदध्मः॥छ॥ अधुनावसरप्राप्तान् गणान् पाणिनिसूत्रक्रमेणोदाहरति॥ सर्वान्यविश्वोभयने

गणरत्नरी॰ मयत्न दः। किंयुस्म दस्म दूहितिसवत्य पदेत दः। उभ। तदन्यो न्यपरस्य रेतराः। समः सिमं त्यां न्यतरे तरेतराः॥ ४॥ सर्वा
दीनि सर्वनामानि। सर्वनाम्नः स्मै। ङसिङ्योः स्मात्स्मिनाविति। ङेङसिङीनां क्रमेण स्मै स्मात् स्मिन् एते आदेशा भ
वंति। जस शी। सर्व इति संख्याप्रकारकलावद्विषये कार्त्स्न्ये। तत्र संख्याकार्त्स्न्ये यथा। सर्वे आयाताः। यावंतो लिखि
2 तास्तावंतस्ता वा ते आयाताः। कार्त्स्न्येन समागता इत्यर्थः। प्रकारकार्त्स्न्ये यथा। सर्वाण्यन्नानि भुक्तानि। सर्वप्रकारा
णीत्यर्थः। कलावत्कार्त्स्न्ये। सर्व ओदनो भुक्तः। य ओदनः स सर्वोपि भुक्त इत्यर्थः। सर्वस्मै। सर्वस्मात्। सर्वस्मिन्। तत्पुरुष
स्यात्र परपदार्थप्रधानत्वात्परमसर्वस्मै इत्यादावपि। असर्वस्मै इत्यादौ नञ्समासेपि सर्वपरित्यागात्। तथा हि। यद्ग
वाचकशब्देन वक्तुमिष्टः स एव [illegible] जात्यादिविकल्पोऽनञ्शब्देनापि विम्बादीनामप्येवं। अतो न सर्वादित्वाद्यातः। य २
त्पुनरूपसर्जनयार्थानामर्थान्तरवृत्तित्वं तदा प्रियसर्वायेत्यादौ न। अन्यस्मै। अन्यतात्। इत्थत्वकववनोयां। विश्वस्मिन्
उभयस्मिन्। नेम इति सर्वार्द्धहानयोः। नेमस्मिन्। यदिति निर्देशो। यस्मिन्। तदिति परोक्षे। तस्मिन्। किमिति प्रश्ने

स इदमः प्रत्यक्षगतं रूपं समीपवर्त्ति चैतदो रूपं। अदसो विप्रकृष्टं तदिति परोक्षे विजानीयात्॥

पयोः।कस्मिन्।युष्मदस्मदितिप्रत्यद्धे।युष्यते सेव्यते उपचारवतीति चाग्निरितित्वकं।अस्मते दीप्यते सत्कारइ
ति अहकं।परात्मवाचिनो युष्मदस्मदो।द्वकौ।भवच्छब्दः परोक्षे।भवकं तः।उदिञ्छंदो भंगभयान्नततः।त्यदि
तितदर्थे वैदिकः।त्यस्मिन्।एष स्यवाडो।एषः सः वाडीत्यर्थः।एतदितिप्रत्यद्धे।एतस्मिन्।उभौ।उभाभ्यां हेतुभ्यां।
अस्य पाठः सर्वनाम्नस्तृतीया चेत्यतदर्थः।त्यदिति समुच्चयवाचकः।त्यकत।अन्योन्यपरस्परशब्दौ क्रियाविनि
मये।अन्यो न्यस्मै।इतरेति पृथगर्थे।इतरस्मिन्।समसिमशब्दौ सर्वार्थे।समस्मिन्।सिमस्मिन्।सिमः शाकः।अ
वबद्ध इत्येके।मर्यादायामित्यपरे।त्यान्यतरशब्दावन्यार्थौ।त्यस्मै।अन्यतरस्मै।अस्यच अस्मादेव गणपाठात्क्षि
प्तिः।शाकटायनस्तु।किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच् वा बहूनां जातिपरिप्रश्ने डतमजितिस्त्रत्वास्यां डत
रडतमौ तौ अन्यतरान्यतमशब्दौ सिद्धौ।ततोऽन्यतरशब्दस्य डतरांतद्वारेणैव ग्रहणे सिद्धेऽन्यतरग्रहणमन्य
तमव्यवच्छेदार्थमित्याह।इतरेतरेति क्रियाविनिमये।ते इतरेतरस्मै॥छ॥एकेदमदसो ज्ञेयाः डतरो डतमस्तथा।स

गण॰ टी॰ मज्ञातिधनेनाम्नि कालादिग्देशावृत्तयः॥५॥ पूर्वापरावराधरदक्षिणोत्तराइत्यमी। व्यवस्थायामसंज्ञायां ङेयाः
सर्वादिकार्यिणः॥ एकेति संख्यासहाययोः। एति गच्छति गणनामित्येकः। एत्यसहाय इत्येकः इति वा। एकस्मिन्। इ
दमिति प्रत्यये। अस्मिन्। अदसिति प्रत्यये। अमुष्मिन्। तेडेरडतमौ प्रत्ययौ तदंतः सर्वादिः। कतरस्मिन्। कतम
3 स्मिन्। एकतरस्मिन्। यतरस्मिन्। ततरस्मिन्। स्वमज्ञातिधन इति। स्वशब्दोर्थचतुष्टयवृत्तिः। तत्रात्मनि ज्ञातिधन ज्ञातिधनस्वास्व मिति
योश्च रूढितोऽस्य वृत्तिः। यथा हरिशब्दस्यानेकं गवानरदर्दुरादिषु। आत्मीये तु सर्वत्र विशेषणरूपतया वृत्ति
स्तथास्य सर्वनामसंज्ञा। स्वे पुत्राः आत्मीयाः। स्वेषां गृहाणां स्वामी। आत्मीयानामित्यर्थः। स्वस्मै बहुमानः। आत्मने
इत्यर्थः। ज्ञातिधनयोस्तु न। स्वैरूढा विधेया। ज्ञाता वित्यर्थः। स्वाय स्पृहयति धनायेत्यर्थः। तथा ज्ञातिधनविशेषण २
त्वेपि स्वशब्दस्य निषेध एव। स्वा ज्ञातयः। स्वं त्रस्याः स्वधनेरूढाः। आत्मीय इत्यर्थः। अपरे तु स्वस्मै पुत्राय। स्वस्मै गवे
इत्यादौ न वत्येवेति व्याचक्षते। अनाम्नि कालदिग्देशावृत्तयइति। पूर्वादयः शब्दाः असंज्ञायां वर्तमाना दिगादिव

त्ययः सर्वादिकार्यमात्रजो भवंति। तत्र पूर्वापरादिशब्दानां केषांचित्प्रविभागतः। सामान्येनाभिधानेऽपि प्रवृत्तिर्दे
शकालयोः। तथाहि। पूर्वापरावरपरोत्तरशब्दा मुख्यवृत्त्यादिकालयोर्वर्त्तंते। तदवच्छिन्नदेशग्रामारामस्तंभ
कुंभादौ च। तथाहि। पूर्वस्यां दिशि वसति। पूर्वस्या दिश आगतः। पूर्वदिक्संबंधात्पूर्वा वापी। पूर्वस्यां वाप्यां शी
तमुदकं। तथा पूर्वस्मिन्ग्रामे वने देशे वा सुखवासः। पूर्वः कालसंबंधात्पूर्वो गुरुः। पूर्वस्मिन्गुरौ वसति। पूर्व
स्मात्प्रासादादागतः। अपरावरपरशब्दत्रयस्य विनापि दिक्कालसंबंधं देशवृत्तित्वं स्यात्। तथाहि। अपरदेश
संबंधादपरो ग्रामः। अवरो वा। तस्मिन्परस्मिन्पर्वते वसति। संनिकर्षे विप्रकर्षे च सर्वासु दिक्षु तुल्यायं वा
पदेशः। ततो न दिग्गतिसंबंधवृत्तिः। एकस्यामेव दिशि स्थितयोर्निकटानिकटयोः परावरादिव्यपदेशप्रवृ
त्तेरेतच्छब्दत्रयापेक्षया मुख्यवृत्त्या सार्थकं देशग्रहणं त्वन्यस्य स्वतो देशवृत्तित्वं संनिकर्षासंनिकर्षयोर्देशाव
काशापेक्षया। ततः परः कालः। अपरोऽवरो वा। परस्मिन्काले जातः। अपरस्मिन्नवरस्मिन्वा। अथ परमक।

गग०र१० लसंबंधात्परः श्रीहर्षः। अपरकालसंबंधादपरो भोजदेवः। परः पाणिनिः। अपरः शिवस्वामी। अपरस्मिन् श्री
हर्षे भक्तः इत्यादि। दक्षिणाधरशब्दौ दिशि दिगवच्छिन्नपर्वतप्रासादादौ वर्त्तेते न तु कालेनापि कालावच्छिन्ने। दक्षि
णस्यां दिशि वसति दक्षिणस्मिन् पर्वते देशे वा तदवच्छिन्ने न हि। अधरस्यां दिशि पर्वताद्वसति। अधरदिक्संबं
धादधरस्मिन् प्रासादे देशे वा वसति। अनाम्नाति किं। उत्तराः कुरवः। संज्ञारूपेण रूढो शब्दोत्तरशब्दः। विदेहवर्ष
५ वासिनां एकस्यामेव दिशि देवकुरूत्तरवर्षादिग्देशकालेष्वोऽन्यत्र। दक्षिणा गाथकाः प्रवीणा इत्यर्थः। एवमध
रेतोकूलरागः। उत्तरे प्रत्युत्तरे वाशंकः। दक्षिणायां कृतेति विप्र इत्यादीनन्नुस्वेषां चैव परेषां च ज्ञायं तकं पसंप
दः। हीणाः परे शत्रवः। इत्याकुपेरे रा इत्यादिप्रयोगेषु कथं जसादीनां सर्वादिकार्यसिद्धिः। न ह्यत्र दिग्देशाघव ४
च्छेदोस्तीति। उच्यते। सारूप्याप्रचारात्। शिष्टानां प्रयोगाददुष्टता॥ छ॥ अंतरं चोपसंव्याने बहिर्योगे तथाऽ
पुरि॥ ह॥ उपसंवीयते आच्छाद्यते यत्तदुपसंव्यानं। यद्वा संवीयतेऽनेनेति संव्यानं। तस्य समीपं उपसंव्यानं तस्मिन्।

बहिर्योग इति। बहिरित्यनावृतो देशस्तेन योगो बहिर्योगः। तेऽएस्मिन्नपूर्वं कृते। अंतरशब्दः सर्वादिर्भवति। अं-
तरस्मै शाटकाय। वस्त्रांतरेणावृतायेत्यर्थः। अंतरस्मै गृहाय बाह्याय चांडालगृहायेत्यर्थः। अपुरीति किं। अं-
तरायां पुरि वसति। बाह्यायामित्यर्थः। अयमनयोरंतरे तापसः प्रतिवसति इत्यादौ मध्यवृत्तित्वेन न भवति। छ।
इति सर्वादिः॥१॥ ॥अथ स्वरादिः॥ स्वः सायं समया दिवा पुनर् रं कामं प्रकामं बहिर् दोषा दोषानिक्त्वांतरा
सनुतरो नक्तं नमो भूयसः। अंतः प्रातर् सांप्रतं परमृते साक्षात्सनसा नयः सत्यं मंक्षु विहायसा सहसा
ञ्जायः स्वयं संवत॥३॥ स्वरिति स्वर्गपरलोकयोः। स्वः सुखयति। एहि जाये स्वरारोहाव। स्वः संज्ञानाते। रुक्ष्मः स्पृहय-
ति। स्वराग गच्छति। छायेव यास्वर्जलधेर्जलस्य। स्वर्वसति। सायं दिनावसाने। सायं दिनावसाने। सायं संयमि-
नस्तस्य। समयेति समीपमध्ययोः। ग्रामं समया स्थितः। च समीपे इत्यर्थः। ग्रामं समया स्थितो। ग्राममध्ये इत्यर्थः॥ दि-
दिवेति दिनार्थे। दिवाकरः॥४ पुनरिति भूयोऽर्थविशेषणयोः। पुनरुक्तं वचः। किं ब्राह्मणाः॥५ अरमिति शीघ्रे।

ग.ग.टी. अरं पचति।६ कामममिति स्वाछंदे निछांगीकारे वा। कामं भुंक्ते। कामं हाम्यतु यः हमी।७ प्रकाममित्यतिशये। प्रका
ममप्रायततयऊनां प्रियः।८ बहिरित्यंतःप्रत्यनीके। बहिर्विकारं प्रपन्नतेः घ यग्विदुः।९ दोषेत्ति रात्रौ। दोषामन्य
महः।१० ह्यइत्यतीते ह्निः। ह्यस्तनः।११ निकषेति सामीप्ये। विलंघ्य लंकां निकषा हनिष्यति।१२ अंतरेति मध्यविनार्थयोः।
5 त्वां मां अंतरा मधुः। अंतरा हरिं न सुखं।१३ सनुतरिति अंतर्धाने। सनुतश्चोरो गच्छति। हिंसानुबंधपूर्वान्तेउरा क
रायनः।१४ नक्तमिति रात्रौ। नक्तंचरः।१५ नम इति प्रजायां। नमोस्तु हरये।१६ भूयइति पुनरर्थे। भूयः पचति।१७ अं
तरिति मध्ये। अंतर्बाष्पः।१८ प्रातरिति प्रत्यूषे। प्रातरेव समुत्थाय। ह्यस्तनेऽपि।१९ अस्तां प्रतमित्यन्याय्ये। संप्रत्यस्तं
प्रतं वक्तुं।२० परमिति किंत्वर्थे। गुणवानसि परमहंकारी।२१ ऋते इति वर्जने। ऋते कृष्णान्नोर्न्य मिमं चपृती।२२ सा ५
क्षादिति प्रत्यक्षतुल्ययोः। साक्षाद्दृष्टा साक्षी। इयं साक्षाद्देवस्त्री।२३ शश्वदिति नित्ये। शश्वत्कुमारः। मीतमिति त्रिपरिज्ञा
ण चिरंतनहिंसाकल्यन निर्जरस्सर्जने चिति श्राकरायनः।२४ साचीति तिर्यगर्थे। साचि विलोकनं युगं नमयति।२५ स

त्वमिति प्रश्ननिषेधस्तु त्वेषु। सत्यं करोषि। ननु किमर्थमिदं सत्यां सत्यं हरिनितं बिनीऊचयुगं।२६ मं क्लितिस्रो घ्रोमं
रूद पातिपरितः परलैरलीनां।२७ विहायसेति वियद्दर्पो विहायसा रम्यतमं विन्नाति।२८ आच्चितिस्रो घ्रोत दासुक
र्तुर्त्येयि जिह्यमुघता।२९ सहसेत्याकस्मिका विमर्शयोः दिवः प्रसूनं सहसा पपात। सहसा विदधीत न क्रियां।३०
प्रायइतिबाहुल्यो प्रायः स इह नेष्यति।३१ स्वयमित्यात्मने त्यर्थो स्वयं प्रसमम ता।३२ संवदिति वर्षा संवत्सरः।।३३।।उ।।
उच्चैर्नीचैरंव श्यं सपदि बलवतः प्राडुरो विःपुरस्तात्रूसी ओषं निकामं युगपदं निशामः साम्यं नादणां सनोषा। रो
दस्यां मूं तुर्वस्कं रु टिति पुरतसोऽनीवसुष्टु प्रसह्य डा कं स्त्राकं मिथ्या वृथा शं ऊं मि पुनम्रधकोऽह्वां नसाऽवो
मनाकः।।२।। ।।उच्चैनीचैरिति महदल्पयोः उत्कृष्टनिकृष्टयोरिति शाकटायनः। किं पुनर्यस्तथोच्चैः। नीचैर्ग
छत्युपरि च दशा।२ अवश्यमिति निश्चये। अवश्यं याता रश्चिरतरमुषित्वापि विषयाः।३ सपदीति तत्क्षणात्री
घ्रार्थयोः सपदि मुकुलिताक्षीं रुद्रसंरंभसीत्या। सपदि च दहत्युपस्थितोऽग्निः।४ बालवदित्यतिशयो बल

गलो॰ २९

हृदपि चिंतोद्दिष्ठितानामात्मन्यप्रत्ययं चेतः ।५ प्रादुरिति नामद्वयं आकाश्ययोः । विष्णोर्दशावताराः प्रादुर्भावाः मत्स्यकूर्मादीनि दश
नामानीत्यर्थः । प्रादुरासीद्वसुंधरा ।६ आविरिति आकाश्ये । आविर्भूतप्रथममुकुलाः ।७ पुरस्तादित्यग्रत इत्यर्थो
रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्तात् ।८ तूष्णीमिति मौने । तूष्णीमास्ते ।९ जोषमिति सुखमौनयोः । जोषमास्ते जिते
न्द्रियः । जोषमास्स्व । जोषमिति शब्दाकरायनः ।१० निकाममित्यतिशये । निकामं दामां गीः ।११ युगपदित्येककालार्थो

6

युगपज्ज्ञानानुत्पादिनः । क्रियासमभिहारेऽपि ।१२ अनिशमिति सातत्ये । यच्चानिशं कीर्त्यते सामीत्यर्धकुत्सयोः । सा
मि तु कुविषयाः । सामिकृतमकृतं स्यात् ।१४ अभीक्ष्णमिति पौनःपुन्ये सातत्ययोः । अभीक्ष्णमस्तु सततयाति दुर्गमी
अभीक्ष्णं वक्ति ।१५ नित्यं नित्यदा सदा ऊस्रं संततमिति सातत्ये कश्चिदाहास नेति नित्या । एष धर्मः सनातनः । स ६
नादिति तिकालं तमपि ।१६ उपेति राज्ञो । उपातनो वायुः ।१७ रोदसीति द्यावापृथिव्यर्थो । आवृणोद्रोदसी रवः ।१८
उभमिति ब्रह्मवावादिरुभमित्येकाक्षरं ब्रह्म ।१९ भूर्भुव इति पृथिव्यन्तरिक्षयोः । भूर्लोको भुवर्लोकः ।२० कमिति वा

त्रिमर्ह्र ईसुखनिदासु।कंजं पद्मं।कंजाः केशाः।कंसुः।कंदर्पः।२२ रु रितिशैलो ध्वा।आनाय रु रिति घरयति विधिर
त्निमतमत्निमुखी न्नतः।रुगित्नात्वपिके चिह्नातरसाह्नर्णं डुतंत्स्पिवंशाघ्रंलघ्रितिचि्रयाविशेषणं।२३ पुरतइत्यग्रतइ
त्यर्थे।पुरतोऽप्रातिरविः।२४ अतावेत्यतिशये।अतीवशोभते।२५ सुष्ठितिप्रशंसानिर्भरयोः।सुष्ठुकांसुष्ठुविभा
ति।२६ प्रसह्येतिशीघ्रार्थेहठार्थे च।प्रसह्यसिंहः किलतां चकर्ष।प्रसह्य वित्तानि हरंतिचौराः।२७ डाकस्मादिति
शीघ्रत्वे।डाग्विदुतं कातरैः।अकस्मात्य त्निसारिकाः।२९ मिथ्येत्यसत्ये।मिथ्याप्रयुक्तो न तमर्पमाह।३० रघेति
विफलत्वे।प्रयुक्त मप्यस्त्रमितो वृथा स्यात्।३१ शमिति सुखे।पशमे।[illegible]।शंकरः।शंयुः।३२ धिगिति
कुत्सिते षट्दर्ध्ययोः।कापथः।कवोष्णमुपभुंजते।पापार्थेऽपि।३३ मिथुनमिति द्वावित्यर्थे।मिथुनं रमते।३४ रुधगि
तिसत्ये।रुधग्विदंतिविद्वांसः।वियोगशोभ्यसामीप्यलाघवेष्वितिवन्।३५ अद्धेतिस्फुटार्थविधारणयोः।आ
राधितोऽद्धा मनुरप्सरोभिः।तत्वातिशययोरित्येके।३६ अंजसेतितत्वशीघ्रार्थयोः।व्रजत्यंजसा मुनिः।३७ अव

इतिबहिरर्थे। अववोगच्छति। ३८ मनागिति स्तोके। मनागनस्यारुह्यावा। ३९ ॥छ॥ मिथुर्मिथो विघ्वगुपांशु ताज
क्मनन्ययनः प्रेत्य मिथः शनैर्मुधा। किमन्च गोषद्धिरमोम्र षांस्तं धिगोनुषकस्वस्तिपुरोऽन्यत्र इदाः॥३॥ मिथुरि
ति द्वावित्यपर्थे। मिथुर्मंत्रयते। उकारांतमप्यन्रतार्थ इति केचित्। १ मिथो इति रहः सहार्थयोः। मंत्रयते [illegible] मिथो।
विरहान्योन्यार्थयोरपि। २ विघ्वगिति समंततो भावो कवा चितो विघ्वगिवागजोगजो। ३ उपांश्विति अप्रकाशोच्चा
7 रणरहस्ययोः। उपांशु जपति। परिवेत्तुमुपांशु धारणां। ४ ताजगिति शीघ्ये। ताजकपवति। ५ मनसितिनियमे।
मनोवर्त्तते। नियमोवर्त्तत इत्यर्थः। ६ वनसित्यन्त्रनाम। वनोमयिधेहि। ७ प्रेत्पतित्वांतरे। पुल्यफलं प्रेत्यमुंक्ते।
अमुत्र शब्दस्याप्यत्र पाठो द्रष्टव्यः। ८ मिथसितिरहोऽन्योन्यार्थयोः। मिथस्त्वदानाषणलोलुपं मनः। ९ शनैरिति ७
क्रियामांद्ये। शनैः शनैर्ददात्येषपादोन्नतानुकंपया। १० मुधेति निष्फले। मुधा बुधा विमुह्यंति। प्रातिकरण इत्य
न्ये। ११ किमिति इच्छा जुगुप्सयोः। किं वदसि। किं राजा यो न रक्षति। ईषदर्थ्योतिशायययोरपि। न किमप्यस्यास्ति।

किमप्येषप्रगल्भते। अन्वगित्यानुकूल्ये। अन्वययो मध्यमलोकपालः। ईषदित्यल्पे। ईषत्पचति। अप्राप्ते च। अ
चिरमिति कालविप्रकर्षे। बालाचिरं बुबिता॥१५ मृषेत्यसत्ये। मृषा प्रवलार्थ इति केचित्॥१६ अस्तमिति क्षेपवि मृषावदति
चोषोदर्शनयोः। अस्तं नास्त्वान्वयात्। धृतिरस्तमिता॥१७ धिगिति निंदाभर्त्सनयोः। धिगिमां दुरन्ततामसारलों।
अनुक्रमत्वेन धिक्कार्विकानां॥१८ आनुषगित्यानुपूर्व्ये। आनुषक्प्रविशति। इंबधुता। अनुमाने ऽनुषगिति शाकटायनमतः। आनु
षदिति दकारान्तं केचित्॥१९ स्वस्तीति पुण्याशीः क्षेममंगलप्रतिवादनेषु। स्वस्त्यस्तु ते॥२० पुरस्तिरस्यग्रत इत्यर्थे। पुरः
सराधाम्भवतां पत्रोधना॥२१ अमन्नित्यति शीघ्रसान्तिप्रोकयोः। अमन्न एवगच्छति। अमन्नरेवेति रेफान्तं वा॥२२ इतिप्र
काशे। समिद्धमिद्धा समहांदधाति। सामा प्यस्मरणाप्योरपि॥२३॥छ॥ ॥स्थाने वरं दुष्टु हि रुग्बलातः प्रवाहु
कं ज्योक्शिरसो मुहुः साधु युक्तं च शानार्थं हलं हमां वागविना सुनानानाय पृथक्कोसुरिदि॥४॥ स्थाने इति युक्तार्थे। स्थाने
हृतायपतिस्त्रिः परोहेः॥१ वरमिति ह्रानोत्कर्षे। वरं विरोधोपि समं महात्मभिः॥२ दुष्टिवति निद्यार्थे। दुष्टु वादी खलः॥३

गंग० टी० हिरुगिति वियोगहिंसावर्जनेषु । हिरुक्करोति वियोगं करोतीत्यर्थः । हिरुक् कर्मणां मोक्षः कर्मह्रयेमोन्दृ सिहानाशः

त्यर्थः । ४ बलादिति हठार्थे । शापयंचितपौलस्त्यबलात्कारकचग्रहः । ५ प्रबाह्णुकमिति समकाले । प्रबाह्णु-

कं गृह्णीयात् । प्राग्बाह्णुकेति केचित्पठन्ति । ६ ज्योगिति कालभूयस्त्वे । ज्योक् सूर्यं दृशे । शीघ्रार्थे सम्प्रत्यर्थे पि ७

४ तिरसि त्यन्तर्धाने तिर्यगर्थयोः । विस्मये अस्ति रोदधेतिः । तिरःकाष्ठं करोति । अप्रवज्ञायामपि ८ मुहुस्सिति पौ-

नःपुन्ये । इह मुहुर्मुदितैः कलभैरवः । १० ऊ इति पूजायां । ऊनाम सारमस्येति ऊनासारः । ऊ अम्भुतम्भव ऊरः । ११

नेनामुखं ऊनायुक्तमिति न्याय्ये । युक्तमेतत् । ११ प्रशानिति समानार्थे । प्रशान् देवदत्तो यज्ञदत्तेन । १२ आर्यहलमिति बला-

सारं त्कारे । आर्यहलं गृह्णाति । आर्यैति प्रीतिबन्धे । हल इति प्रतिषेधविवादयोरिति शाकटायनः । १३ कु ट

मेति दान्तो । मवतः क्षमा । १४ अवागित्यधरवर्षे । वर्षात्षोडशादर्वाक् । १५ विनेति वर्जने । त्वद्विनाऽघवयमु-

सहामहे । १६ नानेति अनेकोभयविनार्थेषु । नानाविधं देहभृतां समाजं । नानापक्षावमर्षः संशयः । नाना

नारीर्निःष्फला लोकयात्रा।१७।इष्यगिति विनार्थो बहिर्विकारं प्रशन्नतेः इष्य ग्विदुः।१८।मुदा तिमुत्कपदेमाघ

मुदि दत्तामा।१९।स्वरादिनिपातमव्ययमित्येषामव्ययसंज्ञायामव्ययादाप्सुप इति विभक्तेर्लुक्।अर्थक

थनं चैषां स्वरादीनामुपलक्षणमात्रं द्रष्टव्यं तथा चोक्तं।निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रयः।अने

स्वरादयः॥११४ कार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनमिति।आकृतिगणश्चायं।तेनान्येपि लक्ष्यानुसारतो द्रष्टव्याः॥छ॥

३३ इति स्वरादिः॥छ॥ ॥अथ चादिः॥ चवाहाहैवेवंनहनहिनवानोचनेहिहिस्वधास्वहारेवैयदिय

३९ द्युतनूनंनहिकिमः।उताहोहाहाहेकिमुतयदिनामेवंतुतथाभगोनोहंहोहोइतिहनुसहोमानंतुनञः॥१॥

२३ चेति।अन्वाचयसमाहारेतरेतरसमुच्चयविनियोगतुल्ययोगितावधारणहेतुषु।निन्दामहगोचानय। अनेकक्रियासंबंधः समुच्चयः।

१९ पाणौ च पादौ च पाणिपादं।हरिश्च हरश्च हरिहरौ।पचति पठति च चैत्रः।अहं च त्वं च पुत्र गच्छावः।इतं वग

११४ वान्विमुखं मनस्त्वया किमन्यदेवं निहिताश्च ते द्विषः।अतीतः पंथानं तव च महिमा वाङ्मनसयोः।हिव

गसा०टी०
द्वार्थे
१

मन्तिमावाञ्जनस्यो पंथानमतीतएवातुद्दंघितवानेवेत्यर्थः॥ ग्रामश्चगंतव्यः शीतं वा शीतात्कथं गम्यत इत्यर्थः॥
पादघूररोपि। नोमः पार्थस्तथैवच॥१॥ वेति विकल्पार्थोपमानइंद्वसमुच्चयेषु। यवैर्वाव्रीहिभिर्वायजेत।
सिंधोर्वाघोमंडलंगोर्वराहः। सावाशंभोस्तदीयाकामूर्त्तिर्ज्जलमयाममानष्टतायेत्यर्थः। वायुर्वादहनो
वा।१६ अह। इतिविनियोगे। त्वंहग्राममंगछ। अयमहंशरणंगछतु। आचारातिक्रमेपि। स्वयंहरथेनयातियु
रूपदातिंगमयति। हपादघूररोपि। इतिहस्माकुरावार्याः॥ अह पूजायामपि। अहमाणवकोनुंज्ञो। ४एवेत्य
वधारणानियोगोपम्यनियोगेषु। अहमेवददामि। अद्यैवा इहैवा। शास्तवैवमेस्तु। अद्यैवगछ। एतेवादयः
पंचायघोगेवस्तनसादयोनभवंतीनववाहाहेवयुक्त इतिनिषेधात्। एवमितिप्रश्नपरामर्शप्रकारेवार्थो ए
पदेशनिर्देशनिश्चयांगाकारवार्थेषु। एवंवादिनिदेवर्षौ। एवंकुरु। अग्निरेवंविप्रः। एवंपठ। एवंतावत्। ए
वमेतत्कः संदेहः। एवंक्रमः। अहार्यमेवंमगनास्तिपचांद्दनहेतिप्रत्यारंभो। नहनोदूपसे। नहि। नवा। अ।

नो।इतिनिषेधे।नहिकरोति।नवाकुर्यात्।अविप्रइवतापसः।विप्रवन्नृपेइत्यर्थः।नोददासितत्वधियंमोः१
चनेतिचिदर्थे।वितर्कप्रत्ययांतात्किमःपरएवास्यप्रयोगः।केचन।कदाचन।कथंचन।१२हीतिस्फुटार्थेहेतौच।
कोप्येवंकुर्यात्।अग्निरिहास्तिधूमोहिदृश्यते।पादपूरणेपि।१३हेइतिसंबोधने।हेरामा।ज्ञा।घ्यविस्मय
योरपि।१४स्वधास्वाहेतिपितृदेवतासंप्रदानयोः।स्वधापितृभ्यः।स्वाहाग्नये।१५रेइत्यनादरदानयोः।
इतिपादपूरणे त्वंहरेकिंकरिष्यसि।रेकरोति।दानंददातीत्यर्थः।१७वैइतिपादपूरणे।योवैयुवाप्यधीयानः।विशेषेपि।१८
यदीतिपक्षांतरे।यदिरामःकिंतपसा।।१९यदुतेतिकाक्वार्थनिर्देशे।सत्ययावाच्योयदुतेहागम्यतां।२०नू
नमितितर्कनिश्चययोः।नूनंशारतंप्रकुर्व्वाहिकाशाः।नूनंसातवप्रिया।२१नहिकिमितिनिषेधे।अस्तिते
किंचिन्नहिकिं।२२उताहोइतिवितर्के।गौरयमुताहोगवयइति।२३हाइतिविषादविस्मयशोकजुगुप्सा
र्तिषु।हालब्धंपाटलिपुत्रं।हागतः।हाप्रियेजानकि।हादेवदत्तं।हाहतोस्मि।२४हा।इतिविस्मयविषादयोः।

गरा०टी० हत विधिल्ललितानां हा विचित्रो विपाकः। रात च्चोपधीयानां हा न विज्ञो जडा वयं॥२५ हे इति संबोधने।
हे राम। म्लाघ्य विस्मययोरपि॥२६ किमुतेति किंपुनरर्थे। प्राज्ञतोपि नावमंतव्यः किमुत राजा॥२७ यदि नामेति नाचमनुष्यः
10 प्रश्नतान्यथात्वे। विप्रोसि यदि नाम मन्मर्षः। कपं नाम मे या श्चर्यार्थे इति केचित्॥२८ इवेनाष दर्थोपमोत्प्रेक्षावाक्या
पातः लंकारेषु। कडारइवायां चंद्र इव मुखं। लिपतीव तमोंगानि। कपमिवेतद्विष्यति॥२९ व इति विशेषावध
रणापूजाभ्यावृत्तिपादपूरणाप्यर्थे हेतुषु। पयोमृष्टत रंडदधि। आत्मादयस्तु प्रमेयं। यस्तु माणवको नु
तु नो। त्वं तु किं करिष्यसि। आख्यास्यामि तेधुना। तस्योपकरणार्थं तु कोच्यते। स्यानुषंगिकं। आनुषंगिकमपि
कोच्यत इत्यर्थः। गृहाधं व्याकरणं मत्वां तु दुर्ज्ञेयं॥३० तु पेति समुच्चयाभ्युपगमनिदर्शनसारूप्येषु। देवद १०
त्तोव्रजत्तपायज्ञदत्तः। तपेति सप्रतिज्ञायां। तथाहि तेशीलमुदारदर्शने। इदमपि तथा॥३१ नगो। अो। हंहो।
हो इति संबोधने। नगो विप्राः। अो शूद्राः। हंहो पांथ किमाकुलः। दुःसहो हा वियोगः॥३२ इति हेतिलोकप्रवाद

इतित्त्वकरोत। इतिद्वकारः।

गमयोः।३६ नु इति प्रश्नश्च इति वचनोपमानवितर्कोत्प्रेक्षापादपूरणेषु। कोनु विचारयति। अकार्षीः कटं।
अयं नु करोमि भोः। इन्द्रस्य नु ते पुरुकृतवयः। अहिर्नु रज्जुर्नु यं जितानु विविधास्तरुचोल्लाः। आख्यास्यामि नु
ते।३७ सह। अमेति एकक्रियायोगे। पुत्रेण सहाधीते। अमा सह जनवतीत्यमात्यः। इत्यानन्विति परमता दृप
नुज्ञा एष प्रतिवचनप्रश्ननयेषु। ननु च कृतविशेषनिस्पृहाः। नन्वनुजानीहि मां। अकार्षीः कटं। ननु करो
मि भोः। एवं प्रश्ननययोरप्युदाहार्यं। निषेधोक्तौ ननु वेत्यपि।४० नञिति निषेधे षट्पाविरूपेषु। अब्राह्मणः।
अनुदरी कन्या। अपचसित्वं वृषल। अकारो न लोपो नञ् इति विशेषणार्थः।४१॥छ॥ ॥छ॥ किंस्वित्स्वत्सुतं य
ज्ञकं ज्ञननकं सत्वासमं साकमः। साईजाभृन्तं सहाव दिव ईम्मों हान वैयावतः। आहोस्विद्विकल्पे किंकि
लालं नमर रे दिष्ट्या चिरस्य प्रागेते मेये नं विरायते नन्न ह वैश्राम्य छुसंकूपतः॥२। किंस्विदिति वितर्कोस्या
गुरयं किंस्वित्पुरुषः। प्रत्युतेत्युक्त वैपरीत्ये। प्रत्युत सातिरस्क्रिया।४ यद्यचेत्येतदव्ययं अमर्षगर्हाश्चर्येषु।

ग.ण.टी. नावकल्पयामिनमर्षया।मिगर्हामहे।आश्चर्यंयच्चनत्तत्तथानवृषलंयाजयेदिति॥३कच्चनेतिकामप्रवेद मू३
ने।कच्चनजीवतितेमर्तो॥४नेति।निषेधोपमानयोः।नैकःसुप्तेषुजागर्याह।तिष्ठदेवोनसविता॥५कमित्य स्वार्थे
नर्थकःपादपूरणे।इमानुकंभुवनासीषधामा।इन्द्रश्चासमं।साकं।सार्द्धमितिसहार्थे॥१०जात्वितिकदाचि
दर्थे।नजातुकामःकामानाम्॥११नन्वितिनिवारणनिषेधयोः।ननुतंगिरा॥१२यदेत्तिहेतौ।यदाजनैःसर्वगतस्त्व
मुपासे॥१३आहोइतिवितर्के।स्थाणुरयमाहोपुरुषः॥१७नवेइतिनिषेधावधारणविशेषनिषेधयोः।न
वैस्त्रैणानिसख्यानि।नवाउएतस्मिन्म्रियसे॥१८यावदितिसाकल्यावधिमानावधारणकालावधिषु।याया
वत्प्रायंतावत्कुरु।सकलंकुर्वित्यर्थः।यावज्जंतातावत्तिष्ठ।यावद्दत्तंतावद्भुक्तं।यावदमत्रंब्राह्मणानामंत्रय ११
स्व।यावच्छिरःस्वेमरुतांचरंति।॥अन्यत्रापिदृश्यते।यावत्तुवत्पाहितसायकस्य।यावज्जीवमधीते॥१९
४ वदितिलक्षणपदे॥१५वडितिवियोगपादपूरणयोः।वडितिठांतं।प्रशंसायामितिसोजः॥५३मितिस्त्रीणांविकारवचने।
ऊनाहमेवंवेत्रि॥१६४

तिरस्क्रिया

आहोस्विदित्याहोवत।२० किलेत्यागमारुचिन्यक्करणसंभाव्यहेत्वलीकेषु। जघान कंसं किल वासुदेवः। ए
वं किल केचिद्वदंति। त्वं किल योत्स्यसे। पार्थ किल विजेष्यसे कुरून्। स किलैवमुक्तवान्। सिंहः किल तां चर्षक
।२१। किंकिलेति कोपसूचकयोः। न मर्षयामि न श्रद्दधे किंकिल न वान्वृषलं याजयेत्।२२ अलमिति भूषणप
र्याप्तिवारणनिषेधेषु। अलंकारः। अलमस्त्वस्य धनं। बक्तित्पर्थः। अलं विवादेन। आलप्यालमिदं भवतोः।२३

दीने

अरेरे इत्यपवद्रूपसंबोधने। अरेरे महाराजं प्रति।२४ दिष्ट्या इत्यानंदे। दिष्ट्या वर्धामहे। समानजन दर्शनप्रीति
त्तोम्याषित्ये के।२५ उमिति कोपोक्तौ। उं सेवास्मि न च प्रिया।२६ चिरस्येति कालभूयस्त्वे। चिरस्य या प्राप्य
मलं त्रिदिग्गजैः।२७ प्रगे इति प्रातरर्थे। प्रगे प्रबुध्यसे।२८ तामा इतिच्च यामया इत्यर्थे। श्रुतं तेराजराजाईलछु
तं मे स्मरतर्षितो।३० येनेति हेतौ। वितरगिरमुदारां येन मूकाः पिकाः स्युः।३१ चिरायेति चिरस्यार्थे।३२ तेनेति हेतौ।
येन दातातेन श्लाघ्यः।३३ नह वै इति निश्चितनिषेधावरणे। नह वै शरीरस्य प्रियाप्रिययोरपहतिरस्तीति।३४ नाराः

नाम.टी. शश्वदिति सार्वकाल्ये वन्यवृत्तिरिमां शश्वत्तास्तात त्यनित्यसहार्थेऽपि शश्वदुक्ता । शश्वत्तं वैरं । शश्वत्कुं
ठतो २५ तुनमिति कल्याणो ऽन्तं युः २६ कूपदिति प्रश्नवितर्कप्रशंसासु । कूपत्यदं गायति । २७ ॥ छ ॥ ॥ छ ॥
१७ वावत्त्वावत्त्वैनुवै खलु चिराद्धेताहं तं तावदेमाशायां ममकुं विरणपद्मावः प्राङ्मुकं माकिरः । अन्यो
न्यस्य यथा कथा चैव परोम यस्मिमाज्ञायां घकिंवेदं न्नाय हयेः यां येन किंरररा चौ पुरा सीमदः ॥ ३ ॥ वावे
त्यर्थौ । अशारीरं चावसंतं प्रियाप्रियेन स्पृहतः । त्वावेति विशेषयुक्ते वावार्थौ । अयं त्वावप्रशास्यते । तावे
त्यनुमान प्रतिज्ञा प्रैष समाप्तिष्विति केचित् । त्वावदित्यपि । २ नुवै इति विशेषः । अयं नुवै प्रश्नप्यते । ३ नुवै इति
वितर्के । को नु वै गच्छति । ४ खल्विति निषेध वाक्यालंकार जिज्ञासानुनय नियमेषु । खलु नत्वा । अपाख १२
ल्वाकुः । स खल्वधीतवेदः । न खलु न खलु मुग्धे साहसं कार्यमेतत् । प्रवृत्तिसाराः खलु मादृशां धियः
प्रवृत्तिसारा एवेत्यर्थः । ५ चिरादिति विराय्यार्थे । विरात्कृष्टोऽसि । ६ हेलावेति निमित्तार्थे । हेतोऽस्यसि । ७

ऋतमितिसत्यार्थोऋतंब्रवीति।८तावदितियावदर्थो।९एइतिसंबोधने।यथाऽन्तरिक्षाद्यो।एकार्वंदेहि।१०
मात्रायामिति अल्पपरिमाणे।मात्रायांभोजकः।११ममेतिप्रत्यगात्मसंबंधे।ममेत्यस्यभावोममत्वं।मम
ता।निर्गतोममेत्यस्मान्निर्ममः।१२कुमित्यनिच्छायस्मरणकुत्सनेषु।कुंमुंच।कुंराक्षसोयं।कुंसत्वमसि।
कुंनिर्लज्जापसरेति।१३चिरेणेतिचिरायार्थे।१४पश्चिदितिसम्यगर्थे।लोकयंतिपशुमन्यमानाः।१५प्राङ्इति
आद्यः।प्रारंभे।प्राङ्गच्छति।१६शुकमितिशीघ्रत्वे।शुकंगच्छति।१७माकिरितिनिषेधवर्जनयोः।माकिष्टे
व्यथिं।नाकरायनस्तुनकिः।शब्दमपि।१८अन्योन्यस्येतिपरस्परार्थे।अन्योन्यस्यस्मरंति।१९यथाकथाचे
त्यनादरे।यथाकथाचदीयतां।२०वषडितिदेवहविर्दाने।वषडिन्द्राय।२१मर्येतिसीमबंधने।मर्याआदी
यतेइतिमर्यादा।सीमबंधनेगृह्यतेइत्यर्थः।२२स्मेत्यतीतेवाक्यपूरणेवा।इतिहस्मोपाध्यायोब्रूते।अंगस्म
विद्वन्माणवकमध्यापय।२३माङितिनिषेधे।माकार्षीः।ङकारोमाङिलुङितिविशेषणार्थः।२४मेतिनि

ग॥०री०

षेधो मा स्म वद तस्य पापं।२५ अप कि मित्यस्तु पगमो। देवदत्त गच्छ। अपकि।२६ चेदिति यद्यर्थे। सं तच्चेदन्
तेन किं।२७ अज्ञायेति शीघ्रार्थे। अज्ञाय सा नियमजं त्वाममुस्मसज्जी।२८ हयो अयाति संबोधने। हयेजायेम
नसा तिष्ठ घोरं। अयि विज्ञ हा हि दृढोपगूहनं।३० अय इति स्मरणे। अय रामो दाशरथिः।३१ न किरित्यौ

मेघइववर्ष ला ल्यर्थः॥५

पम्ये। मे घो नैकि र्वषति। प्रतिषेधवर्जनयोरपि।३२ अरे इति हीनसंबोधने। अरे चोरेति।३३ रात्राविति
निशायामित्यस्यार्थे। रात्रौ रत्नं नुरूपसि।३४ पुरेति प्रबंधन विष्यदासन्निविरातीतेषु। पुरा द्रक्ष्यति
स्थलीं।३५ सामिति सर्वतो भावो। सामादिम्भोऽस्त्र जतास र्वतः भत्यर्थः।३६ आदित्याश्चर्ये। कस्त द्वेदयद्दतुतो।३७॥

13

॥छ॥ ॥श्रौषट् वौषट् स्वाहा होनो हि वा दःस्वरूपं कं चिद्घनेदं गहंताः। चौ न्वेछं वट् पाडं रे रे वतो प्यौ। १३
ॐ हं हिं कं वेदं धां धो नु कं व॥७॥ ॥श्रौषट् वौषट् इति वषट् स्वाहा पौ।२ प्याडिति प्रश्नो सायां। प्यारश्री
घं पठति।३ अहो इति संबोधनाश्चर्ययोः। अहो बत महत्कष्टं। अहो रूपं।४ नो हीति प्रतिषेधे। नोहि प

८सिचांप्रवादितिवदर्थ्यो।वाडितित्त्वरांतंवषडर्थेश्रान्तोजः।स्रिपदितिकूपदर्थ्यो।७कच्चिदितिकामप्रवेद
ने।कच्चिन्महर्षेस्त्विविधंतपस्तत्।८यत्रेतियच्चवत्।९नेदितिशंकायां।नेज्जिह्मायंतोनरकंपताम।प्रति
षेधविचारसमुच्चयेष्वितिशाकटायनः।१०अंगेतिसंज्ञासंबोधनयोः।तदंगसंदिष्टमुपेंद्रयद्रवः।सम्यग्नुप
योगप्राप्तिलोमेष्वितिशाकटायनः।११हंतेतिहर्षानुकंपावाक्यारंभविषादेषु।हंतजाविताःस्मः।पुत्रहंतत
बालकाः।हंततेकथयिष्यामि।हंतहताःपथिकगेहिन्यः।दाननिश्चययोरपि।भूरियंहंतकांरः।[illegible]
[illegible] हंतगच्छामः।निश्चयेनेत्यर्थः।१२चैइतिविरोषवितर्कयोः।अयंविरूप्यतेकस्त्वे।१३न्वेइति
वितर्कपादपूरणयोः।कन्वेएषगच्छति।१४छंबडित्यंतःकरणानिमुखयोः।छंबट्सुध्यासर्वंजयति।छंब
ट्मुखोधावति।१५पाडितिप्याडर्थो।पडित्यपिसाहव्यसंपत्तिसाकल्यगंधाधिकवचनेष्वितिकेचित्।१६
अरेरेइतिअररेइत्यस्यार्थः।१७बतेतिखेदानुकंपासंतोषविस्मयामंत्रणेषु।अहोबतमहत्कष्टं।हताब

गण०री०॰ तवयावीराः। बतञ्जानासीता। अहो बतासि सुरहणीय वीर्यः। बत वितर ततोयं तोर्वा हा हिमां तो।१८ अथो इत्यन्या य
देश्रो। इमं वेदमध्यापय अथो एनं छंदोपि। अप्येष्य पर्यावरूपमाणा पश्चाद्ब्वइष्टव्याः।१९ कमिति प्रश्ने। कं त्वं करो
षि।२० इमित्यसंमतोहं कएवाहा।२१ हिमिति स्तोत्रवचनः। हिं सामगीयते।२२ कदिति हर्षो। कदु डायप्रचेतसे।२३
14 बेदिति वदर्थे। वेडित्ति वषड्यर्थे रांतमिति तोजः।२४ अथेत्यपार्थे। अथ वायुं नियुतः।२५ अथो इति तोर्थे।२६ नुकमि
४ इतं विषु तिवितर्के। अपहिनु कं रक्तः।२७ वेति वेदर्थे। त्वं वृग मिष्यसि फलिष्यति नः कामः।२८ श्री। उमां दं कस्मा उ तयत्र द
न्यत्पर्याम्रमग्रे ऊ विदां मननामाः। अन्यत्र चार्थे हि षु चिछु कं घिं स्विं दं तरे लौ कं पदं हहो उ सः।।५।। छ।। ।। उमि
त्यस्यादानास्मुपगमस्समाप्यपर्यं मंगलेषु। उं इषेत्वा उं मित्युत्क्रवतः।१ भूर्भुवः स्वरो।२ आदित्ये वार्थे। विश्वक १४
र्माविमना आद्विहाया।३ अकस्मादित्य तर्कितोपनते। किमित्य कस्मात्कुप्यसि।४ उत ते ति वितर्के बा। तार्थप्रश्न
पर्क्षांतरे खुग्स्याणुरयमुत पुरुषः। उत मक्षुङ्गिरिं निपातात्। उत दंडः पतिष्यति। एकमेववरं पुंसामुत राज्यमुतास्रमः।।४

यत्रदिति हेत्वर्थे। यदयमधीते तज्ज्ञानाति। ६ अन्यदिति अन्यार्थे। देवदत्तो गतोऽन्यश्च यज्ञदत्तः। ७ पर्याप्तमि
ति सामर्थ्यवारणयोः। त्वयैव पर्याप्तं। पर्याप्तमित्यन्येन। ८ अग्रे इति पुरस्तादर्थे। अग्रेसरः। अग्रवर्णं। ९ कुविदि
तिन्नूर्यर्थे। कुविदंगयवमंतः योगप्रत्यांसास्तितावेषपि। १० आमेति प्रतिवचनावधारणयोः। आमेतावप्रत्यवो
चन्। ११ नामेति प्राकाश्यसंभावनाकोपांगीकारकुत्सनालीकजवविंढिस्मयेषु। हिमालयो नाम नगाधिराजः।
कथं नाम समेष्यति। न नामायं बंधुः। एवमस्तु नाम। को नाम मायां दृष्टेऽधरे रोदिति नाम तन्वी। यदिलेपनमेवेष्टं
लिपतिर्नाम कोपरः। अंधो नाम पर्वतमारोहयोति। १२ अन्यत्रेति वर्जने। पतितान्न बिन्नयादन्यत्रमातृः। १३ घ
इति हिंसाप्रातिलोम्यपादपूरणेषु। घ हिनस्तु मृगं व्याधः। आघाये अग्निमिंधते। १४ अथेति मंगलानंतरारंभप्र
ह्स। श्नकार्त्स्न्याधिकारसमुच्चयेषु। अथ शब्दानुशासनं। स्नातोऽथ भुंक्ते। अथ प्रजानामधिपः। अपशाक्तोपि सेतोकुं। अ
थातो धर्मं व्याख्यास्यामः। भीमोऽथार्जुनः। १५ ईदित्यनर्थकः। वत्संतीवेदांगनांगंति। १६ विघिति सर्वतोभावे। विष्णु इव ह्स।

ग.ए.टी.

अंचतीति विषक ।१७ अनुकमित्यतिशायासुकं शोतते ।१८ किमिति देपप्रश्नेषदर्थातिशायेषु । किमयमपि ब्राह्मणः ।
किमागतोसि । न किमप्यस्ति । किमप्येषप्रगल्भते ।२० स्विदिति प्रश्नवितर्कयोः । कः स्विदेकाकी चरति । अधः स्विदा
15 सीत् उपरि स्विदासीत् ।२१ अंतरेणेति मध्यविनार्थयोः । मणोलस्य चामलमंतरेण स्थितं चूलक्षामरयोर्द्वयं
सः । वल्लक्षामरयोर्मध्ये इत्यर्थः । अंतरेण हरिं न सुखं ।२२ एकपदे इत्यकस्मादर्थे । निहंत्यरीनेकपदा ।२३ अह
निरवधयः हित्यद्भुतखेदयोः । अहह महतां निःसीमानश्चरित्रविभूतयः । अहह कष्टमपंडितता विधेः । दाघोतोपि नि
द्रित्वापि बुभुक्षित यदहह ।२४ उत्तिति वितर्कसंबोधनपादपूरणेषु । कउपवति । उत तिष्ठात वायुस्तु उवं
इमाः ।उ इत्यस्य प्रतिरूपकोप्यस्ति । अस्यत्वयं विशेषः । ऊँमिति सूत्रेण पदे वँनवति ।२५ ॥छ॥ ॥छ॥ सत्फ १५
दं किंचिर रात्राय विनाषैति न चेहुतः । आः शापसमुपजोषं खार्दं टाँ वाँ डाँ स्वरादयः ।६ ॥ सदित्यादरे । सत्कृत्यापाडि
ति चिघ्रासारणो । कुंफदूप्रतिहतोसि ।१ किदिति मर्सनपादपूरणयोः । किकिंतचकदर्योसि । किकिंतदुपयुज्यते ।२

चिरस्यायेति चिरस्यार्थे। चिरस्यायजनेन चिंतितं।४ विनाषेति विकल्पार्थे। विनाषा मावादिः कर्मणाः।५ इतीति हेतुप्रका
रप्रकर्षेष्वमर्थ्य अवस्थास्वरूपविवक्षा नियमसामाप्तिप्रवृत्तवक्ष्यमाणपरामर्शमितेषु। हंतीति पलायते। गौरश्वो हस्तीति
जातिः। इति पाणिनिः। पाणिनिशब्दः प्रकर्षात्प्रसिद्ध इत्यर्थः। क्रमादमुं नारद इत्यबोधि सः। उद्धृत्तिति कर्सं तेन्योणः। त
दस्यास्त्यस्मिन्निति मतुप्।६ धिग्व्यस्तेजो वा यच्चाकारा कालदिगात्ममनांसीति द्रव्याणि। इत्युक्तवंतं परिरभ्य दोर्भ्यां। वि
लिप्स्विनार्थामिति वा वमारदोप्रत्यदसंनिधार्व धसरणाय दार्थविपर्यासादि घपि इष्टव्यः॥६ न वेदिति निषेधो नवे
त्यर्थेव्यं। नो वेदि सपि।७ पुदिति कुत्सायां। पुतं कुत्सितं कसति गच्छति पुत्कसः। पुलितिल्लांतमिति शाकटायनः।८ आः
इति कोपपीडयोः। आः किमेतदिति कोधात्।९ एवाविति प्रग्रहो। गां चाप् करोति।१० समुपजोषमिति सानंदं। समुप
जोषमस्ति।११ खोः कुत्सायां। खोः करं करोति।१२ अट। आवा आ अ इत्येते। अट करोतीत्यादि।१५ आमिति प्रतिव
चना अवधारणयोः। आं किं मां ब्रवीषि। आं चिरस्य प्रतिबुद्धोस्मि।१६ स्वरादिरिति। संबोधन तस्मैनानुकंपा प्र
रण प्रतिषेधेषुयथा मं संन वंनवंती। अ अपेहि।१७ आ एवं मन्यसे।१८ इ इ इं पश्यामि।१९ ई ईदृशः संसारः।२० उ उ

ग.ण.२१. त्रिष्ठा॥२१॥ ऊर्ज॥ षरे॥ बीजं वपति॥२२॥ एहि तौ म वा॥२३॥ उँ॥ स्या व य॥२४॥ ऊ स्व रु स ऐ ऊँ॥ एते मंत्रस्तोमवचनाः॥२०॥ आदिग्र
हणात् कुं खुं गुं घुं इत्यादयोपि॥ अहं॥ सुतं॥ कृतं॥ पर्याप्तं॥ येन॥ तेन॥ चिरेण॥ अंतरेण॥ ते॥ मे॥ चिराय॥ अन्नाय॥ चिर
रात्राय॥ चिरात्॥ अकस्मात्॥ चिरस्य॥ अन्योन्यस्य॥ मम॥ एकपदे॥ अग्रे॥ प्राह्णे॥ हे तौ॥ रात्रौ॥ वेलायां॥ मात्रायां॥ मिते
16 तेष्वन्तत्पोर्यथाक्रमं प्रथमादिसुप्विभक्त्यंतप्रतिरूपकाः छंदोवत्पाठप्रायपंन्यस्ताः॥ छ॥ ॥उत्तरपूर्वान्यत
रा॥ अपरान्यो॥ वेत्तरा॥ धरा॥ वुत्तयः॥ एषु सप्तेते ज्ञेयाः॥ उत्तरपयुष्वापि विद्वद्भिः॥७॥ एषु संता एते चादयो भवंति॥
